Sanskrit Studies in the East

(Volume - I)

Editor

Dr. Subhrajit Sen

Assistant Professor, Department of Sanskrit,
University of Gour Banga,
Malda, 732103
West Bengal

SANSKRIT PUSTAK BHANDAR

38, Bidhan Sarani, Kolkata – 700 006

Contents

संस्कृतजगति तारानाथतर्कवाचस्पतेरवदानम्

डा. सुदीप-मण्डलः 1-10

संस्कृतशास्त्रचर्चायाम् ईश्वरचन्द्रविद्यासागरस्यावदानम्

शङ्कर-मण्डलः 11-28

महामहोपाध्यायः बापूदेवशास्त्री

विवेकानन्द-लक्ष्मणः 29-38

स्वामी दयानन्दसरस्वती

डा. दिलीप-पण्डा 39-53

Īśvar Kaul's Description of Kashmiri Vocative Terms

Professor Satyabhama Razdan 54-74

भारतविद्यापथिकः रामकृष्ण-गोपाल-भाण्डारकरः

सुप्रिय-गोस्वामी 75-87

वैदिकसाहित्यविमर्शने सत्यव्रतसामश्रमिणोऽनन्यत्वम्

डा. कल्याण-पण्डा 88-119

आसामप्रदेशवास्तव्यः संस्कृतसाधकः आनन्दरामवरुया

डा. सञ्जय-भट्टाचार्यः 120-130

ज्योतिषशास्त्रपरम्परायां महामहोपाध्यायसुधाकरद्विवेदिनः अवदानम्

डा. मधुसूदनमिश्रः 131-145

संस्कृतजगति तारानाथतर्कवाचस्पतेः अवदानम्

डा. सुदीप-मण्डलः

उपोद्घातः

पाणिनीयव्याकरणेन यथा असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते तथैव भाषायाः दार्शनिकं तत्त्वमपि प्रतिपाद्यते। मानवबुद्ध्या सम्पन्नेषु आश्चर्यप्रदायकेषु बृहत्स्मृतिस्तम्भेष्वेका अष्टाध्यायी इत्यत्र नास्ति सन्देहः[1]। वङ्गप्रदेशे सप्तदशशतके अष्टादशशतके वा पाणिनीयव्याकरणस्य चर्चा तथा नासीत्। तस्मिन् काले तु कातन्त्रम्, मुग्धबोधः, सारस्वतं चेत्यादीनां व्याकरणशास्त्राणां चर्चा अधिकतया आसीत्। परन्तु ऊनविंशशतकस्य प्रारम्भे पण्डितवर्गैः शोधच्छात्रैः वा पाणिनीयव्याकरणमाश्रित्य सम्यक् कार्यमारब्धम्। तेषु आचार्यः तारानाथतर्क-वाचस्पतिः अन्यतमः। स ईश्वरचन्द्रविद्यासागरस्य सुहृदपि आसीत्। तस्य प्रतिभा बहुमुखी आसीत्। संस्कृतभाषायां विविधशास्त्रेषु च तस्य अद्भुतं पाण्डित्यम् आसीत्। सिद्धान्तकौमुद्याः व्याख्यया सार्कं पाण्डित्यपूर्णानि कानिचन कार्याणि व्याकरणमाधारीकृत्य तेन सम्पादितानि। बहवः ग्रन्थाः, टीकाग्रन्थाश्च तेन स्वयं रचिताः। छात्राणाम् अन्येषां वा अध्ययनसौकर्याय कानिचन पुस्तकानि तेन मुद्रितान्यपि। तेषां विवरणमधः प्रस्तूयते।

१. तारानाथतर्कवाचस्पतेः देशकालौ

पूर्ववङ्गीयस्य वरिशाल इत्याख्यस्य मण्डलस्य वैचण्डीनामके ग्रामे शास्त्रान्तरेषु कृतभूरिपरिश्रमः पण्डितवर्यः रामरामतर्कसिद्धान्तमहाभागः निवसति स्म। तस्य पूर्वजाः तु यशोहर इत्याख्यस्य मण्डलस्य सारलाभिधेये ग्रामे विद्यादानकर्मणि नियुक्ताः आसन्। एकदा वर्धमानाधिपतिना तिलकचन्द्र-वाहादुरेण कालनानामके स्थाने दीर्घिकायाः प्रतिष्ठामुपलक्ष्य देशान्तरात् पण्डितान् आहूय काचित् पण्डितसभा आयोजिता। तत्र सभास्थस्य रामरामतर्कसिद्धान्तस्य

षड्दर्शनविचारेण सर्वे पण्डिताः पराजिताः। तस्य पाण्डित्येन मुग्धः सन् वर्धमानाधिपतिः तिलकचन्द्र-वाहादुरः महता अनुरोधेन रामरामतर्कसिद्धान्तं कालनावासयोग्यं चकार। स रामरामतर्कसिद्धान्तमहाभागः वारद्वयं विवाहम् अकरोत्। प्रथमपत्न्याः गर्भात् शिवदासः इति नाम्ना एकः पुत्रः जातः, द्वे कन्ये च जाते। द्वितीयपत्न्याः गर्भात् दुर्गादासः कालिदासः इत्याख्यौ द्वौ पुत्रौ जातौ। कनिष्ठः कालिदासः शास्त्रादिषु सम्यक् ज्ञानं प्राप्य सार्वभौमः इत्याख्यां ख्यातिं लब्धवान्। यौवनारम्भे स सार्वभौमकालिदासः मेमारीरेलस्थानस्य निकटे घोषपाँचका इति ग्रामस्थस्य हलधरपाठकमहाभागस्य सुलक्षणया कन्यया माहेश्वरीदेव्या सार्कं विवाहमकरोत्। ततः कालक्रमेण १८१२ ईशवीयवर्षस्य नवम्बरमासे माहेश्वरीदेव्याः गर्भात् कालना इत्याख्ये स्थाने महात्मा शब्दार्थरत्नकारः तारानाथतर्कवाचस्पतिः जनिं लेभे।

तारानाथतर्कवाचस्पतिः वारद्वयं मृत्युमुखात् रक्षितः आसीत्। आदौ तारानाथः वंशेषु विविधेषु शास्त्रेषु अद्वितीयः पण्डितः जातः इति श्रुत्वा काचित् स्वसम्पर्कीया नारी तस्य भोजने विषं स्थापितवती। परन्तु काचित् प्राचीना विश्वस्था दासी तद्गूढाभिप्रायं ज्ञात्वा तारानाथं सूचितवती। ततः मृत्युमुखात् स रक्षितः। तदनन्तरं १८३८ ईशवीयवर्षस्य भाद्रमासस्य अन्तिमे कलिकातातः नौकया कालनाभिमुखं गच्छन् आसीत्। तदा सातगेछेनामकस्य ग्रामस्य समीपे नौका जलमग्ना जाता। ततः जलप्रवाहात् जयघोषनामकस्य भृत्यस्य साहाय्येन कथञ्चित् स रक्षितः। एवम्प्रकारेण वारद्वयं मृत्युमुखात् रक्षितः तारानाथतर्कवाचस्पतिः १८८५ ईशवीयवर्षस्य आषाढमासस्य सप्तमदिनाङ्के दिवा द्विवादने स्वपुत्रस्य जीवानन्दविद्यासागरस्य समक्षे पार्थिवं शरीरं त्यक्तवान्।

२. शिक्षाजीवनम्

मातृवियोगानन्तरं पित्रा कालिदासेन पुनः दारपरिग्रहणात् आचार्यः तारानाथः मातुलालये घोषपाँचकानामके ग्रामे निवसति स्म। ततः पिता कालिदासः पञ्चवर्षीयं तारानाथं कालनामानीय खोँडाकृष्णमोहननामकस्य आचार्यस्य पाठशालायां विद्याशिक्षायै प्रेषितवान्। तस्यां पाठशालायां प्रचलिताः

पाठाः वर्षद्वयेन एव तारानाथतर्कवाचस्पतिना अधिगताः। गणितशास्त्रेऽपि तारानाथस्य तादृशी प्रतिभा आसीत् यया मुखेनैव सदुत्तरमलभत। तस्य पाण्डित्यं वीक्ष्य अधिकाः पण्डिताः अचिन्तयन् यत् बालकोऽयं भविष्यत्काले अद्वितीयः पण्डितः भविष्यतीति[2]। ततः नूतनशिक्षादाने गुरोः सामर्थ्याभावं दृष्ट्वा पित्रा कालिदासेन अष्टमवर्षीयबालः संस्कृतव्याकरणज्ञानार्जने प्रवर्तितः। कतिपयेषु वत्सरेषु पितुः ज्येष्ठतातपुत्रात् तारिणीप्रसादन्यायरत्नाच्च मुग्धबोधः, व्याकरणम्, भट्टिकाव्यम्, कुमारसम्भवम्, अमरकोषः, शिशुपालवधमित्यादिषु विषयेषु सम्यक् ज्ञानं लब्धम्। व्याकरणशास्त्रे तादृश्याः दृढायाः व्युत्पत्तेः कारणं भवति ज्येष्ठतात्पुत्रः तारिणीप्रसादन्यायरत्नः।

रामरामतर्कसिद्धान्तेन सह कलिकातासंस्कृतमहाविद्यालस्य अध्यक्ष-पदम् अलंकुर्व्वतः रामकमलसेनमहाभागस्य मित्रता आसीत्। एकदा रामकमल-महाभागेन यदा रामरामसिद्धान्तमहाभागस्य वाटी आगता आसीत् तदा तारानाथताराकान्तयोः शास्त्रार्थविचारं दृष्ट्वा अवदत् यत् “एइ दुइटि छेले लक्ष टाकार आसामी”[3] इति। लक्षार्थपरिमितौ पुरस्कारार्हौ इत्यर्थः। ततः तारानाथं कलिकातायामानीय रामकमलमहाभागः १८३० ईशवीयवर्षस्य मेमासस्य दशमदिनाङ्के अलंकारश्रेण्यां प्रावेशयत्। तदा तस्य वयः अष्टादशवर्षात् किञ्चित् न्यूनम् आसीत्। अलंकारश्रेण्यां विद्यार्जनकाले अवशिष्टेषु समयेषु प्रतिदिनं काव्यवेदान्तादिश्रेणीष्वपि ज्ञानमर्जितम्। वाचस्पतिमहाभागः काव्यशास्त्रस्याध्यापकात् जयगोपालतर्कालङ्कारमहाभागात् कतिपयेभ्यः मासेभ्यः काव्यनाटकादिषु व्युत्पत्तिं लभ्य कण्ठस्थं कृतवान् आसीत्। तस्मिन् काले पुस्तकानि अमुद्रितानि एवासन्। अतः तारानाथेन तेषां पुस्तकानां प्रतिलिपिः सम्पादिता।

तदा अलंकारश्रेण्यां विद्यार्जनकाले ज्योतिषगणितादिविषयेषु अपि अध्ययनमनिवार्यम् आसीत्। अतः तारानाथेन लीलावती, बीजगणितम्, ग्रहलाघवम्, गणिताध्यायः, सूर्य्यसिद्धान्तः, गोलाध्यायः, खगोलम् इत्यादिषु विषयेषु ज्ञानमर्जितम्। तारानाथेन वेदान्तज्ञानं तु कलिकातासंस्कृतमहा-

विद्यालयस्य वेदान्तविभागस्य अध्यापकात् नाथुरामशास्त्रिमहाभागात् लब्धम्। वेदान्तज्ञानार्जनकाले नाथुरामशास्त्रिमहाभागः तारानाथमुद्दिश्य आह "यत्र यत्र मत्सन्देहो विद्यते तत्रैव तारा पृच्छति, तारा अग्रे धावति"[4] इति। ततः १८३१ ईशवीयवर्षस्य मे-मासस्य दशमदिनाङ्गे तारानाथः न्यायवर्गं प्रविष्टवान् आसीत्। वर्षचतुष्टयाभ्यन्तरे तारानाथेन श्रेष्ठनैयायिकात् निमचाँदशिरोमणिमहाभागात् न्यायशास्त्रे व्युत्पत्तिः लब्धा। १८३५ ईशवीयवर्षस्य जनवरीमासस्य पञ्चदशदिनाङ्के महाविद्यालयस्य परित्यागकाले शिक्षापरिषदः सदस्यगणाः तारानाथाय तर्कवाचस्पति इत्याख्यामुपाधिं दत्तवन्तः। ततः काशीं गत्वा आचार्येण तारानाथेन परमहंसात् मासत्रयेण श्रीहर्षकृतं खण्डनखण्डनखाद्यम् अधितम्। पुनश्च तत्रैव अन्येभ्यः आचार्येभ्यः महाभाष्यान्तं पाणिनीयव्याकरणम्, सभाष्यं वेदान्तः, मीमांसादर्शनम्, साङ्ख्यशास्त्रम्, पातञ्जलयोगदर्शनम्, गणितम्, फलितज्योतिषं चेत्यादिषु विषयेषु व्युत्पत्तिः लब्धा। ततः शास्त्रचर्चायां काशीस्थान् पण्डितान् पराजित्य कालनामागम्य च विद्यादाने नियुक्तः अभवत्।

३. कृतयः

शिक्षाग्रहणादनन्तरमादौ कालनायां स्वगृहे विद्यादानकर्मणि स्वात्मानं नियोजितवान्। ततः १८४५ ईशवीयवर्षे संस्कृतमहाविद्यालये अध्यापकरूपेण तस्य नियोगः जातः। तदनन्तरं वाचस्पत्याचार्येण संस्कृतव्याकरणम्, काव्यम्, नाटकम्, अलङ्कारः, न्यायः, साङ्ख्यम्, वेदान्तः, पातञ्जलमहाभाष्यम्, मीमांसा, उपनिषद्, स्मृतिः, ज्योतिषं चेत्यादीनि दुष्प्राप्याणि बहूनि शास्त्राणि सम्पादितानि रचितानि च। केषाञ्चन पुस्तकानां वृत्तिः अपि तेन रचिता। ततः रचिताः सम्पादिताः वा ग्रन्थाः टीकाग्रन्थाः च तेन मुद्रिताः। तेषां सर्वेषां विस्तरेण संकलनं यद्यप्यशक्यं तथापि किञ्चित् विवरणं प्रदर्श्यते। तथाहि–

संस्कृतमहाविद्यालये विद्याप्रदानकाले किरातार्ज्जुनीयम् शिशुपालबधम् चेति महाकाव्यौ अमुद्रितावस्थायाम् आस्ताम्। अतः छात्राणाम् अन्येषाञ्च अध्ययनसौकर्याय आचार्येण तारानाथतर्कवाचस्पतिना १८४७

ईशवीये वर्षे ग्रन्थद्वयं मुद्रितम्। तदानीं कलिकातायां काव्यद्वयस्य कविवल्लभचक्रवर्तिकृता टीका लभ्यते स्म। परन्तु तया टीकया उपकारविशेषस्य अदर्शनात् काशीतः मल्लिनाथकृतां टीकाम् आनीय वाचस्पत्याचार्येण द्वौ ग्रन्थौ मुद्रितौ। पुनश्च तदा लीलावतीबीजगणितौ अपि अमुद्रितावस्थायामासीत्। अतः छात्राणाम् अध्ययनसौकर्याय तौ ग्रन्थौ अपि मुद्रितौ। ततः १८४९ ईशवीयवर्षे वैयाकरणभूषणसारोऽपि तेन मुद्रितः।

१८५१ ईशवीये वर्षे आचार्येण तारानाथतर्कवाचस्पतिना मल्लिनाथकृत-टीकासहितं रघुवंशं कुमारसम्भवञ्च प्रकाशितम्। १८६६ ईशवीयवर्षे एतद्ग्रन्थद्वयं मल्लिनाथकृतटीकया सह पाणिनीयसूत्राद्यंशं विशेषरूपेण विचार्य द्वितीयवारं प्रकाशितम्। १८६६ ईशवीयवर्षे एव अष्टमसर्गात् सप्तदशसर्गपर्यन्तस्य कुमारसम्भवस्य मुद्रणं विहितम्।

तस्मिन्नेव वर्षे शब्देन्दुशेखरशब्दकौस्तुभवैयाकरणभूषणसारादीनां व्याकरणशास्त्राणां दुरुहविषयान् आश्रित्य सरलसंस्कृतेन शब्दार्थरत्नमिति व्याकरणग्रन्थः आचार्येण तारानाथतर्कवाचस्पतिना रचितः। ग्रन्थोऽयं पाणिनीय-सिद्धान्तैः सुगठितस्य संस्कृतव्याकरणस्य दार्शनिकं भागं प्रतिपादयति। वाक्यपदभेदेनास्य शब्दार्थरत्नग्रन्थस्य काण्डद्वयं वर्तते। तत्र वाक्यकाण्डे वाक्यसम्बन्धिविचाराः, पदकाण्डे पदसम्बन्धिविचाराः विद्यन्ते।

पुनश्च १८५१ ईशवीये वर्षे संस्कृतवाक्यरचनायाः कौशलं ज्ञातुं वङ्गभाषया वाक्यमञ्जरी इति नाम्ना पुस्तकमेकं तेन मुद्रितम्।

१८५६ ईशवीये वर्षे आचार्येण तारानाथतर्कवाचस्पतिना महावीर-चरितनामकः ग्रन्थः मुद्रितः। १८५७ ईशवीये वर्षे धनञ्जयविजयव्यायोगस्य टीकां प्रस्तूय तेन मुद्रितम्। १८५८ ईशवीये वर्षे तेन छन्दोमञ्जरी प्रकाशिता।

१८६१ ईशवीयवर्षे वाचस्पत्याचार्यः वङ्गानुवादसहितं गयामाहात्म्यं गयाश्राद्धादिपद्धतिञ्च मुद्रितवान्। ग्रन्थेऽस्मिन् पुत्रकर्तृकश्राद्धकरणम्, किं प्रयोजनञ्च हिन्दूनाम्, तद्विषया शास्त्रीययुक्तिः इत्यादयः विषयाः प्रतिपादिताः।

१८६२ ईशवीयवर्षे पाणिनिविरचितायाः सिद्धान्तकौमुद्याः सरला नाम्नी एका टीका तेन प्रस्तुता। सा च टीका भारतवर्षे योरोपखण्डे अमेरिकाप्रदेशे च अतिशयेन समादृता। तया टीकया एव वाचस्पत्याचार्यस्य माहात्म्यं वर्धितम्। एतस्याः टीकायाः सम्पादनादनन्तरं हिमालयात् सेतुबन्धरामेश्वरपर्यन्तं सर्वदेशीयाः पण्डिताः व्याकरणशास्त्रस्य अद्वितीयपण्डितरूपेण तारानाथतर्कवाचस्पति-महाभागं स्वीकुर्वन्ति स्म। पाणिनिव्याकरणाध्ययने एतेन पुस्तकेन यावत् साहाय्यं लभ्यते तावत्साहाय्यम् अन्येन केनापि पुस्तकेन नैव लभ्यते।

१८६४ ईशवीयवर्षे तेन रत्नावली मुद्रिता। १८६५ ईशवीयवर्षे ढेङ्कानलाधिपतेः आदेशानुसारेण मधुसूदनसरस्वतीप्रणीतस्य सिद्धान्तविन्दु-नामकस्य ग्रन्थस्य प्रतिपाद्यं विषयमाश्रित्य संक्षेपेण सरलसंस्कृतेन च दशदिवसाभ्यन्तरे तेन सिद्धान्तविन्दुसारनाम्नी एका टीका रचिता। तां टीकामवलोक्य पूज्यपादः तर्कपञ्चाननमहाभागः कथयति यत् वाचस्पतिः ऐशिकशक्तिसम्पन्नः महापुरुषः, अधुना भारतवर्षे वेदान्तशास्त्रेषु वाचस्पति-समतुल्यः कोऽपि पण्डितः नैव विद्यते इति[5]। पुनश्च भगवता शङ्कराचार्येण विरचिते ब्रह्मस्तोमनामके शास्त्रे विद्यमानान् दश श्लोकान् आश्रित्य आचार्यः तारानाथतर्कवाचस्पतिः स्वयं टीकामेकां रचितवान्। तत्र ब्रह्मस्तोत्रव्याख्याग्रन्थे विशुद्धस्य ब्रह्मस्तोत्रस्य व्याख्यया वेदान्तमतानि सरलसंस्कृतेन प्रतिपादितानि।

देशेऽस्मिन् वैदिकमन्त्राणां विलोपं प्रत्यक्षीकृत्य चतुर्वेदसम्बन्धिमन्त्रान् उद्धृत्य च वाचस्पत्याचार्यः पञ्चवत्सरं यावत् कठोर-परिश्रमेण कर्म्मकाण्डपद्धतेः संस्कारहेतौ तुलादानादिपद्धतिः इत्याख्यं ग्रन्थं रचितवान्। ग्रन्थोऽयं १८६६ ईशवीयवर्षे प्रकाशितः। तस्मिन्नेव वर्षे वाचस्पत्याचार्यः वेणीसंहारः इति नाटकस्य टीकां रचितवान्।

१८६७ ईशवीयवर्षे आशुबोधनामकं नवीनमेकं व्याकरणशास्त्रं रचितम्। ग्रन्थकारस्य जीवद्दशायामस्य द्वितीयं संस्करणं जातम्।

१८६९ ईशवीयवर्षात् आरभ्य १८७० ईशवीयवर्षपर्यन्तम् अकारादि-क्रमेण शब्दस्तोममहानिधिनामकः संस्कृताभिधानग्रन्थः पञ्चखण्डेषु प्रकाशितः।

जनसनमहोदयः आङ्गलभाषया यया रीत्या अकारादिक्रमेण अभिधानग्रन्थं रचितवान्, तया रीत्या एव तारानाथतर्कवाचस्पतिमहाभागेन अकारादिक्रमेण प्रत्येकस्य शब्दस्य व्युत्पत्या सह अभिधानं रचितम्। इतः पूर्वमेतादृशम् अभिधानं न केनापि रचितम्। सम्प्रति ये भाक्ताः महात्मनः स्वकीये अभिधाने शब्दानां व्युत्पत्तीः प्रदर्शितवन्तः, ते तारानाथतर्कवाचस्पतेः पदसाधनं दृष्ट्वा तदपहृत्य च लिखितवन्तः इत्युच्यते।

१८६९ ईशवीयवर्षे अकारादिक्रमेण धातुरूपादर्शनामकः ग्रन्थोऽपि मुद्रितः। तत्र धातुरूपाणां साधनप्रक्रिया विस्तरेण सुन्दररीत्या च प्रदर्शिता। १८७० ईशवीयवर्षे स्ववृत्त्या सह मुद्राराक्षसमालविकाग्निमित्रे वृत्तरत्नाकरश्चेत्यादयः ग्रन्थाः मुद्रिताः। तस्मिन्नेव वर्षे पाणिनिना विरचितायाः अष्टाध्याय्याः सूत्राण्यपि प्रकाशितानि। १८७१ ईशवीयवर्षे स्वविरचितया टीकया सह साङ्ख्यतत्त्व-कौमुदीहितोपदेशौ, मुक्तावल्याख्यया टीकया सह भाषापरिच्छेदश्च प्रकाशिताः।

१८७२ ईशवीयवर्षे भामिनीविलासनामकं खण्डकाव्यं स्ववृत्या सह मुद्रितम्। तदनन्तरं दण्डिना विरचितस्य दशकुमारचरितस्य, बाणभट्टेन विरचितस्य कादम्बरी इति ग्रन्थस्य च टीकां विरच्य १८७२ ईशवीये वर्षे मुद्रितम्। तस्मिन्नेव वर्षे आचार्येण तारानाथतर्कवाचस्पतिना सर्व्वदर्शनसंग्रहः, कविकल्पद्रुमः, परिभाषेन्दुशेखरः, बहुविवाहवादः, गायत्रीमन्त्राणां व्याख्या च प्रकाशिताः।

ततश्च वाचस्पत्याचार्येण कठोरपरिश्रमेण अष्टादशवर्षैः वाचस्पत्याभिधानं प्रस्तुतम्। अस्य प्रथमखण्डस्य प्रकाशनं १८७३ ईशवीयवर्षे जातम्। सम्पूर्णस्य ग्रन्थस्य मुद्राङ्कणकार्यं १८८४ ईशवीये वर्षे समापितमासीत्। ५६०० पृष्ठात्मकम् तदभिधानं चारि-पेजी-फरमार-लंप्राइमार इत्यक्षरे लिखितमासीत्। अस्य मुद्रणव्ययः आसीत् अशीतिसहस्रम्। ग्रन्थेऽस्मिन् पाणिनीयप्रत्ययपरिनिष्ठितानि रूपाणि वर्तन्ते। लौकिकानां वैदिकानाञ्च शब्दानां विभिन्नार्थे प्रयोगस्थलानि सप्रमाणं लिखितानि। चार्वाकः, माध्यमिकः, योगाचारः, वैभाषिकः, सौत्रान्तिकः, आर्हतः, रामानुजः, माध्वः, पाशुपतः, शैवः, प्रत्यभिज्ञः, रासेश्वरः, पाणिनिः, न्यायः, वैशेषिकः, मीमांसा, साङ्ख्यः,

पातञ्जलः, वेदान्तः इत्यादिषु दर्शनेषु विद्यमानाः पारिभाषिकशब्दाः, केषु केषु अर्थेषु क्व च ते प्रयुक्ताः इत्यादयः विषयाः सोदाहरणं लिखिताः। श्रौतगृह्यसूत्रयोः पारिभाषिकशब्दाः अपि व्याख्याताः। अष्टादशानां पुराणानां प्रतिपाद्यविषयाः संक्षेपेण वर्णिताः। पुरा विद्यमानानां भारतीयनृपतिगणानाम् इतिहासः अपि संक्षेपेण वर्णितः। आर्यानां मतानुसारेण भूगोलः खगोलश्च वर्णितौ। तान्त्रिकाणां वैद्यानाञ्च शास्त्रसम्बन्धीयाः शब्दाः औषधप्रणयनव्यावस्था च सङ्कलिताः। ज्योतिषशास्त्रविषये आर्यादीनां प्रधानानां ज्योतिर्व्वेत्तादीनां मतान्यपि सङ्कलितानि। फलितज्योतिषम्, गणितज्योतिषम्, राजनीतिशास्त्रम्, अलङ्कारशास्त्रम्, छन्दःशास्त्रम्, सङ्गीतशास्त्रम्, धनुर्वेदशास्त्रम्, पाकशास्त्रम्, शिक्षाशास्त्रम्, कल्पशास्त्रम्, निरुक्तशास्त्रम्, अश्वशास्त्रम्, हठयोगशास्त्रम्, वास्तुशास्त्रम् इत्यादिषु शास्त्रेषु विद्यमानाः पारिभाषिकशब्दाः अप्यत्र वर्णिताः। अनेन ग्रन्थेन एव वाचस्पत्याचार्यस्य सर्वेषु शास्त्रेषु सम्यक् अधिकारः आसीदित्येतत् ज्ञायते। ततः १८७३ ईशवीये वर्षे लिङ्गानुशासनं प्रस्तुय मुद्रितम्।

४. उपसंहारः

वाचस्पत्याचार्यस्य शिक्षाजीवनं कृतीः च पर्यालोच्य एतदेव ज्ञायते यत् सर्वेषु शास्त्रेषु तस्य सम्यक् अधिकारः आसीदिति। शास्त्ररचनायाम्, टीकारचनायाम्, मुद्रणकार्ये च तस्य महत् सामर्थ्यम् आसीत्। न केवलं शास्त्रादिरचनायां मुद्रणकार्ये वा अपि तु पाककर्मादिष्वपि तस्य पटुता आसीत्। रन्धनकार्ये तस्य तादृशी अलौकिकी क्षमता आसीत् यया बह्वीषु चुल्लिषु होराचतुष्टयेन स्वयं द्वाविंशतिप्रकाराणां व्याञ्जनानां पाकं सम्पादयति स्म। गणितज्योतिषे, मानसिकागणनायाम्, ज्योतिषगणनायामपि स अद्वितीयः पण्डितः आसीत्। गणनया उक्तस्य वचनस्य सत्यतायां सिद्धायां सति तद्गणनायां सर्वेषां विश्वासः अपि आसीत्। वक्तृतायामपि तस्य अद्भुतं पटुत्वम् आसीत्। शास्त्रेण अखण्डया युक्त्या वा तारानाथतर्कवाचस्पतिः संस्कृतभाषया, हिन्दीभाषया, वङ्गभाषया वा सभास्थानां सहस्रजनानाम् अन्तकरणम् आकर्ष्य स्वमतानुवर्तिनं करोति स्म। कदाचित् वक्तृताप्रभावेन उच्चन्यायालये अपि जयं लब्धवान्।

तारानाथतर्कवाचस्पतिः कालनायां यदा स्वगृहे छात्रान् संस्थाप्य पाठयन् आसीत् तदा अन्येभ्यः अर्थग्रहणापेक्षया बाणिज्येन अर्थोपार्जनं श्रेयः इत्येवं विचिन्त्य विद्यादानकर्मणा साकं तन्तोः, काष्ठस्य, धान्यात् तण्डुलान् प्रस्तूय तद्विक्रयणस्य च बाणिज्यं कृतवान्। तदनन्तरं १८४५ ईशवीयवर्षात् आरभ्य प्रतिमासं ९० रूप्यकात्मकवेतनेन संस्कृतमहाविद्यालये अध्यापनकर्मणि नियुक्तः जातः। एवञ्च सर्वेषु शास्त्रेषु, रन्धनादिक्रियासु, तन्त्वादिबाणिज्यकर्मसु, नारीशिक्षादिषु, अध्यापनकर्मणि च तस्य सम्यक् अवदानम् आसीत् इत्येतत्सर्वं संक्षेपेण सरलतया समासेन च वर्णितमिति शम्।

सहायकग्रन्थपञ्जी

1. तर्कवाचस्पतिः, तारानाथः; *शब्दार्थरत्नम्*; कलिकाता– काव्यप्रकाशयन्त्र; १८७२।
2. तर्कवाचस्पतिः, तारानाथः; *शब्दार्थरत्नम्*; शर्मा, उमाशङ्करः (सम्पादकः); वाराणसी– चौखम्बा भारती अकादमी; २०१५।
3. भर्तृहरिः; *वाक्यपदीयं प्रकीर्णकप्रकाश-नारायणहिन्दीव्याख्योपेतम्*; तिवारी, हरिनारायणः (सम्पादकः); वाराणसी – चौखम्बा संस्कृत सीरीज आफिस; २०१५।
4. भर्तृहरिः; *वाक्यपदीयं प्रतिभाव्याख्योपेतम्*; खण्डूडी, सत्यनारायणः (सम्पादकः); वाराणसी चौखम्बा कृष्णदास अकादमी; २०१४।
5. Liebich, Bruno; *Reviewed Work: Konkordanz Panini-Candra vol. 5 No. 4* (English); America– Linguistic Society of America; 1929.
6. Vidyāratna, Śrīśambhucandra; *Tārānātha Tarkavācaspatira Jīvanacarita (Hindi)*; Kalikātā– Iṃrājisaṃskṛta yantra.
7.

तथ्यसूत्राणि

---

[1] The descriptive grammar of Sanskrit, which Panini brought to its highest perfection, is one of the greatest monuments of human intelligence and (What concerns us more) an indispensable model for the description of languages. - Reviewed Work: *Konkordanz Panini-Candra* by Bruno Liebich, Page No- 268.

[2] *तर्कवाचस्पतिर जीवनचरित* इति ग्रन्थे पत्रसंख्या - ६

[3] तत्रैव पत्रसंख्या - ७

[4] तत्रैव, पत्रसंख्या - ९

[5] तत्रैव, पत्रसंख्या - १०